# shrIdvAdashanAmapanjarastotram

# શ્રીદ્વાદશનામપઞ્જરસ્તોત્રમ્

## Document Information

Text title : dvAdashanAmapanjarastotram

File name : dvAdashanAmapanjarastotram.itx

Category : vishhnu, panjara, dvAdasha, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran

Latest update : December 24, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીદ્વાદશનામપઞ્જરસ્તોત્રમ્

પુરસ્તાત્ કેશવઃ પાતુ ચક્રી જામ્બૂનદપ્રભઃ ।
પશ્ચાન્નારાયણઃ શઙ્ખી નીલજીમૂતસન્નિભઃ ॥ ૧॥

ઇન્દીવરદલશ્યામો માધવોર્ધ્વં ગદાધરઃ ।
ગોવિન્દો દક્ષિણે પાર્શ્વે ધન્વી ચન્દ્રપ્રભો મહાન્ ॥ ૨॥

ઉત્તરે હલભૃદ્વિષ્ણુઃ પદ્મકિઞ્જલ્કસન્નિભઃ ।
આગ્નેય્યામરવિન્દાભો મુસલી મધુસૂદનઃ ॥ ૩॥

ત્રિવિક્રમઃ ખડ્ગપાણિર્નિરૃત્યાં જ્વલનપ્રભઃ ।
વાયવ્યાં વામનો વજ્રી તરુણાદિત્યદીપ્તિમાન્ ॥ ૪॥

ઐશાન્યાં પુણ્ડરીકાભઃ શ્રીધરઃ પટ્ટસાયુધઃ ।
વિદ્યુત્પ્રભો હૃષીકેશો હ્યવાચ્યાં દિશિ મુદ્ગરી ॥ ૫॥

હૃત્પદ્મે પદ્મનાભો મે સહસ્રાર્કસમપ્રભઃ ।
સર્વાયુધઃ સર્વશક્તિઃ સર્વજ્ઞઃ સર્વતોમુખઃ ॥ ૬॥

ઇન્દ્રગોપકસઙ્કાશઃ પાશહસ્તોઽપરાજિતઃ ।
સ બાહ્યાભ્યન્તરં દેહં વ્યાપ્ય દામોદરઃ સ્થિતઃ ॥ ૭॥

એવં સર્વત્રમચ્છિદ્રં નામદ્વાદશપઞ્જરમ્ ।
પ્રવિષ્ટોઽહં ન મે કિઞ્ચિદ્ભયમસ્તિ કદાચન ॥ ૮॥

ભયં નાસ્તિ કદાચન ૐ નમ ઇતિ ॥

ઇતિ શ્રીદ્વાદશનામપઞ્જરસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*shrIdvAdashanAmapanjarastotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*